# ॥ બૃહદમ્બાર્યાશતકમ્ ॥

.. bRihadambAryAshatakam ..

sanskritdocuments.org

August 2, 2016

# .. bRihadambAryAshatakam ..

# ॥ બૃહદમ્બાર્યાશતકમ્ ॥

## Document Information

Text title : bRihadambAryAshatakam

File name : brihadamba100.itx

Category : shataka

Location : doc_devii

Language : Sanskrit

Subject : hinduism/religion a hymn on the presiding Goddess bRihadambA at the rock-cut temple of shrI gOkarNEshvarar in tirugOkarNam (pudukkOTTai).

Transliterated by : Sridhar Seshagiri seshagir at engineering.sdsu.edu

Proofread by : Sridhar Seshagiri seshagir at engineering.sdsu.edu

Latest update : September 3, 2002

Send corrections to : Sanskrit@cheerful.com

Site access : http://sanskritdocuments.org

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted for promotion of any website or individuals or for commercial purpose without permission.

Please help to maintain respect for volunteer spirit.

August 2, 2016

sanskritdocuments.org

# ॥ બૃહદમ્બાર્યાશતકમ્ ॥

શ્રીગોકર્ણનિકેતા શ્રીવિદ્યાદિવ્યશુક્તિકામુક્તા ।
શ્રીકણ્ઠનિત્યમિલિતા શ્રીચક્રેશી પુરોઽસ્તુ મે માતા ॥ ૧॥

કલ્યાણં કલયેન્નઃ કલ્યાનસ્માન્ કરોતુ શતમબ્દાન્ ।
કલ્યાતઙ્કમપાસ્યેત્ કલ્યાણી નઃ સદૈવ બૃહદમ્બા ॥ ૨॥

તરુણારુણપ્રકાશં તરુણા વકુલેન ભાસુરનિવેશમ્ ।
ગુરુણા સ્તનેન નમિતં ગુરુણા સદયેન વસ્તુઃ ન કથિતમ્ ॥ ૩ ॥

વકુલદ્રુમૂલસદનાં વનજસહાધ્યાયિપરિલસદ્વદનામ્ ।
વલ્ગુસ્મિતેક્ષ્યરદનાં વન્દે દૃક્તર્જિતામ્બુજચ્છદનામ્ ॥ ૪॥

એકા દ્વિલોકસુખદા ત્ર્યક્ષર્યાખ્યાપિતા ચતુઃપીઠા ।
પઞ્ચામ્નાયશિરઃસ્થા બૃહદમ્બ ત્વં ષડધ્વજનયિત્રી ॥ ૫॥

નાસાભાસા ચમ્પકશોભાક્ષોભાવહાસ્તુ બૃહદમ્બા ।
પારાવારાત્મજયા સેવ્યા દેવ્યા ગિરાં ચ ભવ્યાય ॥ ૬॥

કમ્બુલસત્કંધરયા કૈશ્યવિનિર્ધૂતનીલકંધરયા ।
પાલ્યે શોણાધરયા પાવિતવકુલદ્રુમૂલસદ્ધરયા ॥ ૭॥

પીનસ્તનાવનમ્રે પાદનતામ્ભોજવાસિનીકમ્રે ।
વાણીજિતસરસામ્રે વાચો વલ્ગન્તુ ધામ્નિ મે તામ્રે ॥ ૮॥

વકુલવનીવાસિન્યા વિદ્રુમસચ્છાયચેલવાસિન્યા ।
હૃદ્રાજીવાસિન્યા હૃદયં શંભોર્હૃતં સુવાસિન્યા ॥ ૯॥

વન્દે શ્રીબૃહદમ્બાં વલ્ગુગતાપાસ્તરાજકાદમ્બામ્ ।
આશ્રિતજનાવલમ્બામાસેવે કૈશ્યધૂતલોલમ્બામ્ ॥ ૧૦॥

કેસરસરભાસુરયા કેવલદાસીભવત્સુરાસુરયા ।
કલિતા વાણી સુરયા કયાપિ મે ભક્તિનમ્રભૂસુરયા ॥ ૧૧॥

શિરસા ધૃતસોમાયાઃ શ્રીગોકર્ણૈકદિવ્યધામાયાઃ ।
પદનમ્રાણાં માયાઃ પાપવિધાત્ર્યઃ કદાપિ નોમાયાઃ ॥ ૧૨॥

આનન્દસારસીમામાનઙ્ગોત્કર્ષપોષકાપાઙ્ગામ્ ।
આનન્તું બૃહદમ્બામાનન્ત્યં મૂર્ધ્નિ વાઞ્છામિ ॥ ૧૩ ॥

વકુલાટવીનિવિષ્ટાં વન્દકસંરક્ષણાત્યભિનિવિષ્ટામ્ ।
નિરવધિકરુણાવિષ્ટાં નિત્યં સેવેમહીષ્ટશિપિવિષ્ટામ્ ॥ ૧૪॥

અભિધાયિતહૃલ્લેખામતીતવિદ્વત્સુકવિજનોલ્લેખામ્ ।
પદપલ્લવનમલ્લેખાં પશ્યામઃ શાશ્વતીં તટિલ્લેખામ્ ॥ ૧૫॥

કરુણામૃતવર્ષિણ્યાઃ સેવકસર્વાપરાધમર્ષિણ્યાઃ ।
વકુલવિપિનહર્ષિણ્યા વશ્યાઃ સ્મઃ શંભુચિત્તકર્ષિણ્યાઃ ॥ ૧૬॥

કરુણાઝરસરસાક્ષીમરુણાધરશોભિસુન્દરસુહાસામ્ ।
તરુનાર્ધઘટિતદેહાં વરુણાલયજેડિતાં શિવાં વૃણુમઃ ॥ ૧૭॥

ધન્યાઃ કે નુ મદન્યા વલયેઽવન્યા યતો વકુલવન્યાઃ ।
મૂલે મોક્ષવદાન્યા માન્યા કન્યા ગિરોર્હિતમાન્યા મે ॥ ૧૮॥

કેચિત્ ત્વાં કુલમૂલે સાક્ષાત્કુર્વન્ત્યહં વકુલમૂલે ।
અર્ધેશ્વરાં કતિપયે માતઃ સર્વેશ્વરામહં કલયે ॥ ૧૯॥

વાઞ્છિતસિદ્ધ્યૈ ભવિતા લાઞ્છિતચિકુરા ચકોરવૃત્તિકૃતા ।
કાઙ્ક્ષિતચરણા સદ્ભિઃ કાં ક્ષિપ્રં નાતનોતિ સંસિદ્ધિમ્ ॥ ૨૦॥

અરુણિમસારસમષ્ટિઃ સંસૃતિકૂપોત્તરણયષ્ટિઃ ।
કલિતામૃતૌઘવૃષ્ટિર્બૃહદમ્બા ભાતુ મે કૃપાદૃષ્ટિઃ ॥ ૨૧॥

સામજસમાનગમના સામસમાજોપગાનતુષ્ટમનાઃ ।
સમજાનુપેતચરણા સમરસતાપન્નપન્નગાભરણા ॥ ૨૨॥

વિશ્વપતિવશ્યહૃદયા નશ્વરવિશ્વાસપશ્વનાશાસ્યા ।
અશ્વમુખસ્તવશસ્યા નિઃશ્વસિતાનુશ્રવાસ્તિ બૃહદમ્બા ॥ ૨૩॥

લઘુ તવ ચરણં શરણં તરણં મૃત્યોર્ભજામિ બૃહદમ્બ ।
યાવત્ તરસા જરસા પરસાદઙ્ગાનિ ન કૃતાનિ ॥ ૨૪॥

પ્રભવતિ યત્ર ન ગૌર્વા નોર્મીણાં સંકથા ન વા જડતા ।
કોઽપિ વકુલાલવાલે જયતિ ચિરાનન્દસાગરોઽપાર ॥ ૨૫॥

સ્થાવરરાજતનૂજા ભાવરસસ્ફીતવૈખરી જનની ।
પીવરવક્ષોજનતા ધીવરદૌહિત્રસૂક્તિપરિચિન્ત્યા ॥ ૨૬॥

સર્વાનન્દનિવાસા શક્રશતાનન્દમુખ્યસુરસેવ્યા ।
ધૃતનન્દસૂનુદેહા ભૂમનિજાનન્દમેદુરા જયતિ ॥ ૨૭॥

અપહૃત્ય ચિત્તશલ્યં ભક્તિમતામાતનોષિ કૈવલ્યમ્ ।
બૃહદમ્બ કો ન્વકલ્યં દેવાન્તરં ત્વ્યા પાલ્યમ્ ॥ ૨૮॥

ભવનીકૃતગોકર્ણં ભાસ્વન્મણિકુણ્ડલસ્ફુરત્કર્ણમ્ ।
ધ્યાયામિ શોણવર્ણં ધામ પરં ભક્તમાનસાભ્યર્ણમ્ ॥ ૨૯॥

કલિતા લલિતા કલિતાપહરા દહરાન્તરવિચિન્ત્યા ।
વકુલે મુકુલેઽચકુલે સદયાભ્યુદયા કિમન્યદેવૈર્મે ॥ ૩૦॥

વારાણસીનિષેવાં વારાશ્યવગાહનાનિ ચ ન તન્યાઃ ।
વારાન્ બહૂનથાઙ્ઘ્રોર્વારા પૂયસ્વ વકુલમૂલેશ્યાઃ ॥ ૩૧॥

શ્રેયશ્ચ યા વિધત્તે શ્રીબૃહદમ્બાપદામ્બુરુહચિન્તા ।
કલિકલુષણિ વિભિન્તે મદમપિ કાર્તાન્તમાહન્તા ॥ ૩૨॥

નીવી નવાન્યવચસાં સા વીણા વાણ્યભિપણાર્યા ।
ભાવી ભવાર્તિહરણી દેવી દયતાં સદૈવ બૃહદમ્બા ॥ ૩૩॥

માતા સારસનેત્રા માન્યા વારાશિકન્યકાનેત્રા ।
મૃગચક્રવર્તિપત્રા મનસિ મમ સ્તાત્ સ્તનોલ્લસત્પત્રા ॥ ૩૪॥

વેલતિગાનુકમ્પા વકુલવનામ્ભોદમઞ્જુતરશમ્પા ।
ભવતપ્તામૃતઝમ્પા ભવતુ હૃદિસ્થા કૃતદ્વિષત્કમ્પા ॥ ૩૫॥

પદ્યાયામાદ્ યાયામાદ્યાયામમ્બ તાવકજનાનામ્ ।
વિદ્યાં તે નિરવદ્યાં વિદ્યાં ગોકર્ણરાજ્ઞિ દયયા તે ॥ ૩૬॥

તરણિં તમશ્છટાનામરણિં જ્ઞાનાનલસ્ય કલયામિ ।
તરણિં ભવામ્બુરાશેઃ સરણિં વેદ્યાગમસ્ય બૃહદમ્બામ્ ॥ ૩૭॥

વક્ષોજભારનમિતા લક્ષોત્તરવેદગીઃપ્રમિતા ।
ઇક્ષોર્મધુરોક્તિમિતા ન ક્ષોભ્યા ત્વં દયાધુની સ્તિમિતા ॥ ૩૮॥

હૃદયં પુરાણવચસાં સદયં દીનાવને પરં તેજઃ ।
મદયન્નધરં શંભોસ્તદયં યાતો જનઃ શરણમ્ ॥ ૩૯॥

માઙ્ગણતીરકુટીરા મેદુરવક્ષોજલિપ્તપાટીરા ।
પતિધૃતચન્દ્રાપીડીરા ધ્યેયામ્બા મુક્તિદાનશૌણ્ડીરા ॥ ૪૦॥

આપન્નરક્ષણાર્થે ચાપં પુણ્ડ્રેક્ષુમાદધાના સા ।
રોપં ચ પૌષ્પમમ્બા પાપં પ્રોત્સારયેન્મમાશેષમ્ ॥ ૪૧॥

દક્ષા નિરર્ગલા સા દાતું સ્વર્ગં ત્રિવર્ગમપવર્ગમ્ ।
બૃહદમ્બા મહદન્તર્વાસા ભાસારુણા જયતિ ॥ ૪૨॥

વારિદસોદરચિકુરાં વદનપરાભૂતવિસ્ફુરન્મુકુરામ્ ।
સુન્દરહાસાઙ્કુરાં સેવેઽમ્બાં વાઞ્જિતામૃતાસારામ્ ॥ ૪૩॥

બિન્દુત્રયાત્મકતયા કલયન્તિ ત્વામપારકરુણાબ્ધિમ્ ।
યે બૃહદમ્બ ભવાબ્ધિર્વિદુષાં તેષાં કતિ પૃષન્તિ ॥ ૪૪॥

નીવારશૂકશાતા નીહારાંશુચ્છટાશીતા ।
બાલાદિત્યશતાભા મૂલાધારાત્ સમુદ્યતા ભાસિ ॥ ૪૫॥

વિશ્વપ્રથાનિદાનં વેદશિરઃસ્ફૂર્જદપદાનમ્ ।
બૃહદમ્બિકાભિધાનં બહુશઃ સેવેય મઙ્ગલવિધાનમ્ ॥ ૪૬॥

આલોલનીલવેણી ફાલોત્સઙ્ગાનુષઙ્ગિદિવ્યમણી ।
કાલોન્મિષત્કુવલયચ્છાયાદાયાદલોચનદ્વિતયા ॥ ૪૭॥

મણિતાટઙ્કસમુદ્યદ્ઘૃણિગણનીરાજિતકપોલમ્ ।
નાસાગ્રલમ્બિમુક્તાભાસા સંપૃક્તમન્દહાસરુચિઃ ॥ ૪૮॥

અરુણાધરજિતબિમ્બા વક્ત્રપરાભૂતશીતકરબિમ્બા ।
પીનોન્નતસ્તનભરા પાશસૃણીષ્વિક્ષુચાપકરા ॥ ૪૯॥

શિઞ્જિતમઞ્જીરલસન્મઞ્જુલચરણાબ્જનમ્રસુરલોકા ।
બૃહદમ્બા મમ હૃદયે નિવસતુ વાત્સલ્યશીતલાલોકા ॥ ૫૦॥

ભાનવ્યા યા નવ્યા માનવ્યાઘાતભીતયા દીપ્ત્યા ।
આતન્વીત સુતન્વી સા તન્વીડ્યા શ્રિયં તવામ્બ તનૂઃ ॥ ૫૧॥

ઇચ્છાત્તવિશ્વશિલ્પાં પઞ્ચબ્રહ્મપ્રકલ્પિતસુતલ્પામ્ ।
વન્દીકૃતાદિજલ્પાં વન્દે દેવીં દયોદયાનલ્પામ્ ॥ ૫૨॥

કેચિન્મદાલસાક્ષં કાલોન્મીલત્કુવાલજયદક્ષમ્ ।
ગાત્રં તવાપરોક્ષં કુર્યુર્બૃહદમ્બ દુષ્કૃતવિપક્ષમ્ ॥ ૫૩॥

શયધૃતચારુવિપઞ્ચી શ્રોણીબિમ્બાવલમ્બિમણિકાઞ્ચી ।
ગોકર્ણેશ્યધવઞ્ચી દૃષ્ટા ચેત્ કો ન ભક્તિરોમાઞ્ચી ॥ ૫૪॥

કાલં પ્રયાપ્ય મેડલં ભારૈર્દુઃસ્થૈરચારુકુચભારૈઃ ।
ક્ષામૈરશુકશ્યામૈરન્યૈર્દેવૈરધૂતનતદૈન્યૈઃ ॥ ૫૫॥

સોમાર્ધસલ્લલામા સા મામવ્યાત્ સુવકુલવનદામા ।
કામારિદિવ્યરામા પરમા સંવિદ્ ઘનશ્યામા ॥ ૫૬॥

કોમલવાકુલમૂલા સ્તોમલસત્કુન્તલાધિગોકર્ણમ્ ।
યામલવર્ણ્યા કાપિ શ્યામલવર્ણા વિભાતિ ગુરુમૂર્તિઃ ॥ ૫૭॥

પ્રવહત્કરુણાપાઙ્ગં પ્રત્યગ્રામ્ભોદમેચકશ્યામમ્ ।
વિશ્વાધિકાન્તરઙ્ગં વકુલવને ભાતિ પાલિતપાઙ્ગમ્ ॥ ૫૮॥

શિખિપિઞ્છં તાપિઞ્છં સભયં ધમ્મિલ્લશોભયા સ્વભયા ।
આદધતી દધતીન્દું માઙ્કણરોધોડઙ્કણે જયત્યમ્બા ॥ ૫૯॥

વામકુચચુમ્બિવીણામર્ધોન્મીલન્મનોજ્ઞદૃક્કોણામ્ ।
વિશ્વાવનપ્રવીણાં વકુલાટવ્યાં નમામિ રમમાણામ્ ॥ ૬૦॥

અંસાનુષઙ્ગિચૂલી સંસારાપારવારિધેરાલી ।
શં સા દદાતુ કાલી કંસારીડ્યા સદાત્તવકુલાલી ॥ ૬૧॥

વીણાવાદિનિ શર્માસ્વાદિનિ કર્માદ્રિભેદિનિ સ્યાન્મે ।
વિશ્વાકારિણિ ચન્દ્રાલંકારિણિ બોધકારિણિ પ્રેમ ॥ ૬૨॥

અરુણાંશુકામુપાસે નિગમં શુકરૂપિણં દધતીમ્ ।
દદતીમાશુકવિત્વં સ્વાંશુકદર્થીકૃતાતસીં જનનીમ્ ॥ ૬૩॥

સજ્જનકૃતવરિવસ્યં સારસપરિહાસસાદરનિજાસ્યમ્ ।
ગાન્ધર્વસ્ય રહસ્યં કિંચન કુર્યાન્મદાશાસ્યમ્ ॥ ૬૪॥

દૂર્વાશ્યામલકાયે દુર્વાસોમુખ્યમૌનિગણસેવ્યે ।
અર્વાસ્યવર્ણિતગુણે કુર્વાશાપૂર્તિમદ્ય બૃહદમ્બ ॥ ૬૫॥

લીલાલોલા વકુલાટવ્યામવ્યાચ્છુકાભિરામકરા ।
વીણાક્કાણાભિરતા માતા ભૂતાધિપસ્ય દયિતા નઃ ॥ ૬૬॥

દુરિતેભ્યો ન કૃતેભ્યો નાપિ કૃતાન્તાદ્ બિભેમિ દુર્દાન્તાત્ ।
દૃષ્ટા દયાસમષ્ટિર્વકુલવને શ્યામલાકૃતિર્યેન ॥ ૬૭॥

ધન્યોઽહં ધન્યોઽહં વંશદ્વિતયી મદીક્ષિતા ધન્યા ।
પરિપણમામ્નાયાનાં શ્યામલમાલોકિ વકુલમૂલે યત્ ॥ ૬૮॥

વિત્તાદિભિર્નરાણાં મત્તાનાં દુર્લભા વિના ભક્તિમ્ ।
તત્તાદૃશાનુભાવા સત્તા કાચિદ્ વિભાતિ ગોકર્ણે ॥ ૬૯॥

પરિહૃતસર્વવિકલ્પા પરિધૃતશીતાંશુકોરકાકલ્પા ।
બાલદિવાકરકલ્પા બૃહદમ્બા પાતુ સત્યસંકલ્પા ॥ ૭૦॥

ચમ્પકનીપરસાલાઃ સન્ત્યેવાન્યે રસાસ્થલે સાલાઃ ।
વકુલે તુ મેઽસ્તિ ભક્તિર્યસ્મિન્ દૃષ્ટે સ્મૃતા ભવત્યમ્બા ॥ ૭૧॥

ભ્રમરીવિભ્રમકબરીં ભૂભ્રમણેનૈવ પઞ્ચકૃત્યકરીમ્ ।
સંવિત્સુખામૃતઝરીં સંસેવેઽમ્બાં ભવામ્બુરાશિતરીમ્ ॥ ૭૨॥

કુમુદેશપાકચૂડં કલિતસુરોદ્યાનમાલિકાપીડમ્ ।
અઞ્ચિતવકુલાક્રીડં કિંચિદુપાસે દયાનિવહનીડમ્ ॥ ૭૩॥

સરલે સરલે વિરલે તરલે હૃન્નેત્રકુચસીમ્નિ ।
વસ્તુનિ મેઽસ્તુ નિવાસ્તુનિ કરુણાયાશ્ચિત્તવૃત્તિરપતન્દ્રા ॥ ૭૪॥

કં ગણયેઽન્યમુપાસ્યં મઙ્ક્ષણકાસારતીરકૌતુકિનઃ ।
અઙ્ગણવાકુલસુમનોરિઙ્ગણસૌરભ્યનિર્ભરાદ્ધામ્નઃ ॥ ૭૫॥

વેશન્તતુલ્યનાભી વાસન્તસ્ફારપુષ્પશુભવેણી ।
સીમન્તભાસિવુસૃણા સા હન્ત પ્રેક્ષિતાદ્ય બૃહદમ્બા ॥ ૭૬॥

શ્રુતિલાસિકાલિરઙ્ગાયિતસ્વમહિમાક્ષિનિર્જિતકુરઙ્ગા ।
પ્રોદ્યત્કૃપાતરઙ્ગા પાયાદમ્બા મૃગેશ્વરતુરઙ્ગા ॥ ૭૭॥

નિબિડઘનસ્તનકુમ્ભા નિજવેણીન્યસ્તશીતકરડિમ્ભા ।
નિવસિતવરકૌસુમ્ભા નિવસતુ ચિત્તે જગદ્ધિતારમ્ભા ॥ ૭૮॥

ગમ્ભીરનાભિકુહરાં કુમ્ભીન્દ્રસ્પર્ધિમુગ્ધસંચારામ્ ।
તાં ભીમસ્ય ન ભામાં કુમ્ભીપાકેચ્છવો ભજન્ત્યજ્ઞાઃ ॥ ૭૯॥

વાહ્યાપિ નો પુરાણ્યા તત્ત્વવિપણ્યા યદચ્યુતાગણ્યા ।
સા વર્ણ્યાસ્તુ શરણ્યા કસ્ય ધરણ્યામુમાખિલવરેણ્યા ॥ ૮૦॥

ગોકર્ણેશયસેવ્યાં ગોકર્ણેશપ્રિયાં પ્રણમન્ ।
ગોકર્ણે વસ તૂષ્ણીં ગોકર્ણે ભ્રામકાંસ્તુ જપ મન્ત્રાન્ ॥ ૮૧॥

ક્ષુદ્રાર્થદાનશીલા ન દ્રાગારાધિતાઃ પ્રસીદન્તિ ।
નિદ્રાલસાસ્ત્વદન્યે તદ્રાજ્ઞિ ત્વાં ભજે વકુલવન્યાઃ ॥ ૮૨॥

આગમકોટિનિરુક્તામાબ્રહ્મસ્તમ્બરક્ષણાસક્તામ્ ।
આર્યામનાદિમુક્તામાલોકે કેસરાટવીસક્તામ્ ॥ ૮૩॥

સેવે કિંચન દિવ્યં ભાવે તેજઃ સમસ્તસંસેવ્યમ્ ।
ધીવેદિમેત્ય હૃદ્યં સંવેદ્યાખ્યં દહેન્મમાભવ્યમ્ ॥ ૮૪॥

વાણી ચામ્બુધિકન્યા સા વૃણુતે તં બલાદિવાનન્યા ।
કિંચિત્ ત્વયા જનન્યા કટાક્ષિતો યઃ કિયત્યથ સ્ત્ર્યન્યા ॥ ૮૫॥

શક્તઃ કોઽપિ યદીયાં લઙ્ઘિતુમાજ્ઞાં ન લોકેષુ ।
યસ્યાજ્ઞાં બૃહદમ્બા સાધ્યાસ્તે કસ્તતો હ્યધિકઃ ॥ ૮૬॥

અષ્ટાપદાદિ સર્વં લોષ્ટાભિન્નં સદાભિપશ્યન્તઃ ।
અષ્ટાત્મનઃ પ્રણયિનીં શિષ્ટાઃ પશ્યન્ત્યનન્યતયા ॥ ૮૭॥

દાહં ભવાનલોત્થં વ્યાહન્તું વાકુલાટવીં દેવીમ્ ।
સોઽહં ભજામિ ભક્ત્યા યાહંતારૂપિનીતિ ગુરુણોક્તા ॥ ૮૮॥

કુલદૈવતં મદીયં કુલકુણ્ડાભ્યન્તરૈકવાસ્તવ્યમ્ ।
કુલપર્વતેશભાગ્યં કુલાયમીક્ષેઽનુપાધિકરુણાયાઃ ॥ ૮૯॥

અગ્નાવિષ્ણુમુખેડ્યા ભગ્નાશેષાર્તિરાત્મભક્તાનામ્ ।
ભુગ્નાલકા મદીયે લગ્ના ચિત્તે ચકાસ્તુ બૃહદમ્બા ॥ ૯૦॥

અવ્યાજભૂતકરુણા ભવ્યાપાઙ્ગપ્રકલ્પિતત્રાણા ।
અવ્યાદ્ધિલિપ્તઘુસૃણા સ્તવ્યા શ્રુત્યા સદાપ્તગોકર્ણા ॥ ૯૧॥

અમ્ભોજતુલ્યનયનામઙ્કાલંકારિણીં ત્રિનેત્રસ્ય ।
અઙ્ગીકૃતાદિમરસામ્બાં ગોકર્ણનાયિકાં સેવે ॥ ૯૨॥

ભાર્યામનાદિયૂનોઽહાર્યાધીશાન્વવાયમણિભૂષામ્ ।
આર્યામુપાધ્વમનિશં કાર્યાકાર્યાવમર્શનિષ્ણાતાઃ ॥ ૯૩ ॥

વરદે સુરદેશિકવાઙ્નિકરાસુકરાનુવર્ણને ધામ્નિ ।
કરવૈ મુરવૈરિમુખૈઃ શિરસા સુરસાર્થકૈર્નતે ચેતઃ ॥ ૯૪॥

મઙ્કણકાસારઝરીસમીરધારામનોહરોદારે ।
મિલદલિલોલન્મુકુલે વકુલવને લાલસીતિ સકલેશી ॥ ૯૫॥

પશ્યલ્લલાટદારાન્ પરિપૂર્ણાનન્દસંવિદાકારાન્ ।
કઠિનઘનસ્તનભારાન્ કલયે ગોકર્ણપાવનાગારાન્ ॥ ૯૬॥

ગોકર્ણેશમહિષ્યા વ્યાકર્તું કો ગુણાન્ ભવેદીશઃ ।
સ્વીકર્તું હૃદિ વા તાન્ શ્રીકર્કાસ્યં તમેકમપહાય ॥ ૯૭॥

તુષ્ટા શ્રીબૃહદમ્બા કષ્ટાનુન્મૂલયેત્ કૃપાદૃષ્ટ્યા ।
ઇષ્ટાનિ ચ પ્રદદ્યાન્મૃષ્ટાં પ્રતિભાં પરત્ર ચ શ્રેયઃ ॥ ૯૮॥

વન્દે વિશ્વવિધાત્રીં વન્દે વિદ્યાચિમુક્તિફલદાત્રીમ્ ।
વન્દે વકુલવનેશીં વન્દે ગોકર્ણવલ્લભસુકેશીમ્ ॥ ૯૯॥

જયતિ સ્ફારદયાર્દ્રા ગોકર્ણાધીશવલ્લભા જયતિ ।
જયતિ પ્રસાદસુમુખી શ્રીરઘુનાથેન્દ્રપૂજિતા જયતિ ॥ ૧૦૦॥

આખ્યાં સકૃદ્ યદીયામાખ્યાયાશેષવાઞ્છિતં લભતે ।
તસ્યાઃ સ્તુતિપ્રિયાયાઃ યઃ સ્યાત્ સ્તોત્રં પઠન્ સ પૂર્ણાર્થઃ ॥ ૧૦૧॥

॥ ઇતિ શ્રીબૃહદમ્બાશતકં સંપૂર્ણમ્॥

Encoded and proofread by Sridhar Seshagiri seshagir at engineering.sdsu.edu

.. bRihadambAryAshatakam ..
was typeset on August 2, 2016

Please send corrections to sanskrit@cheerful.com